International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2018; 4(6): 166-170
© 2018 IJSR
www.anantaajournal.com
Received: 20-09-2018
Accepted: 23-10-2018

**डॉ.कपिलदेव हरेकृष्ण शास्त्री**
सहायक-आचार्य, परंपरागत संस्कृत विभाग, फेकल्टी ओफ आर्टस्, महाराजा सयाजीराव विश्वविद्यालय: वड़ोदरा, गुजरात, भारत

Correspondence
**डॉ.कपिलदेव हरेकृष्ण शास्त्री**
सहायक-आचार्य, परंपरागत संस्कृत विभाग, फेकल्टी ओफ आर्टस्, महाराजा सयाजीराव विश्वविद्यालय: वड़ोदरा, गुजरात, भारत

# वैदिकवाङ्गमये पुराणशास्त्रस्य विवेचनम्

**डॉ.कपिलदेव हरेकृष्ण शास्त्री**

**प्रस्तावना**

**पुराणशब्दनिर्वचनम्**

अत्र पुराणमिति शब्दस्य निर्वचनं-व्युत्पत्ति-निरुक्तिश्च व्याकरण-निरुक्तग्रन्थेषु उप लभ्यते | यथा व्याकरणे “पुरा भवं पुराणम्” इत्यर्थे पुरा इत्यव्ययशब्दात् “सायंचिरंप्राह्वेगेऽव्ययेभ्यष्ट्युट्युलौतुट्च” (१) इति सूत्रात् ट्यु प्रत्ययांतरम् इत्संज्ञकस्य टकारस्य लोपे “युवोरनाकौ” इति सूत्रेण योरनादेशे च विहिते तुड़ागमाच्चपुरातन इति शब्दो निष्पन्नो भवति | किन्तु भगवता पाणिनिना “पूर्वकालैक सर्वजरत्पुराण नव कवला: समानाधिकरणेन” तथा च “पुराणप्रोक्तेषु ब्राह्मण कल्पेषु”(२) सूत्रयो: पुराणशब्द प्रयोगान्नियम प्राप्त तुड़गमाभावात् पुराण इति शब्दे “अटकु-प्वाङ्नुम्व्यवायेऽपि” इत्यनेन णत्वे च कृते निपातनात् पुराण शब्दस्य सिद्धिर्भवति | पुरा शब्दात् पुरा अण्यते अतीतान्नर्थान् अण्यते जीवयति इति व्युत्पत्तौ दैवादिकाद् ‘अण् प्राणने’ इति धातो: ““नन्दिग्रहिपचादिभ्योल्युणीन्यच:” (३) इति सूत्रात् अच् प्रत्यय कृते पुराणशब्दो निष्पद्यते | पुरा अव्ययात् प्राचीनात् अतीतान् अर्थान् अणति कथयति इति व्युत्पत्तौ भौवादिकात् ‘अण्’ धातो: पचादित्वाद् अचि प्रत्यये कृते पुराणेति शब्द: सिद्धयति | पुराणम् पञ्च लक्षणम् “पुराणम् ग्रन्थभेदे च क्लीवे त्रिषु पुरातने” “पुराणम् यजुषा सह” (४) चेत्यादिषु संदर्भेषु पुराण शब्दस्य नपुंसक लिंगे प्रयोगात्तस्य क्लीवत्वमेव |

श्रीकृष्ण त्रिपाठिना स्वकीये पुराणपर्यालोचने ग्रंथे पुरा शब्दात् ‘णीन् प्रापणे’ धातो: औणादिके डप्रत्यये कृते टीलोपाण्णत्वविधानाच्च पुराणशब्दस्य व्युत्पत्ति: कृता |(५)

वैदिकशब्दानां निरुक्तिम् कुर्वता यास्काचार्येण स्वकीय निरुक्तग्रंथे पुराण शब्दस्यापि निर्वचनम् कृतम् |

तेन तत्र लिखितम् पुराणम् कस्मात्- “पुरा नवं भवति” अत्र शब्दस्य नवमित्यर्थो विहितो यास्केन | पुराणविषयेऽस्य तात्पर्यमिदम् वक्तुमुचितं यत् येषु ग्रन्थेषु प्राचीनभूतेष्वपि नवीनताया भावोऽक्षुण्णो भवेत् ते पुराणशब्देन व्यपदेशया ग्रंथा भवन्ति | पुराणशब्दस्यैता व्युत्पत्तयो निरुक्तिश्च पाणिनीव्याकरणानुसारं यास्काचार्य अनुसारं च विहिताः | पुराणशब्दस्य स्वगाम्भिर्यार्थं प्रकटयन्त्यो निरुक्तयः पुराणेष्वपि दरीदृश्यन्ते | पुराणशब्दश्रवणाद् एव प्राचीनतायाः स्मरणम् स्वतः एव जायते | येषु ग्रन्थेषु सर्गप्रतिसर्गमन्वन्तर वंशानुचरितानि पुरातनानि वर्णितानि ते पुराणशब्दवाच्यः ग्रंथाः संस्कृतसाहित्ये शोभतेतराम् | यथोक्तम् -

सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च |
वंशानुचरितं चैव पुराणम् पञ्च लक्षणम् ||(६)

इत्थं पुराणस्य व्युत्पत्तिं निरुक्तीं च अवधार्य विद्वद्भिः पुराणशब्दस्य अयमर्थो-अवधारितः यत् पुरातनकाल इतस्ततः प्रचलितानां लोककथानां प्रशासकानां उदात्तराज्ञाम् महर्षिणाम् च वंशानां भगवदवताराणाम् भक्तानां देवानामसुराणाम् चालौकिककथानां सृष्टिस्थिति प्रलयानां मन्वन्तणाम् धार्मिकव्रतदानानां च वर्णनं यत्र उपलभ्यते ते पुराण-अभिधेय ग्रंथाः पुरातन कल्पाश्रिताः उच्यन्ते |

**पुराणानामावश्यकता**

पुराणसाहित्यमस्ति अगाधसमुद्रसमम् | तत्र उपयोगिनां समस्तानां विषयणाम् संगोपांगं विवेचनं विद्यते | वेदर्थस्य समयकज्ञानाय पौराणिक साहित्यं नितरामपेक्षते | पुराणेषु यावत् धर्मार्थकाममोक्ष चतुर्वर्गस्य सिद्धेः साधनमुपलभ्यते न तावदन्यत्र क्वचन प्राप्यते| महर्षिणा व्यासेन अष्टादशपुराणेषु सर्वेषाम् धर्माणाम् सारः परोपकारः, पुण्यम्, परपीड़नं च महत्पापं निर्दिष्टमस्ति | अयं मानवातायाः महान् मौलिक आदर्शोऽस्ति | तथाचोक्तम्-

अष्टादशपुराणेषु व्यासस्य वचनद्वयम् |
परोपकारः पुण्याय पापाय परपीड़नम् ||(७)

मानवजन्मनः प्रधान लक्षयम् भगवत्प्रप्तिरस्ति, तत्साधनानि च पुराणानि सन्ति | निष्कामकर्मद्वारा त्यागवृत्तिग्रहणपूर्वकं स्वर्गापवर्गयोः मार्गस्य सुलभानि साधनानि पुराणान्येव सन्ति | पुराणानि सर्वसाधानयोगक्रियासिद्धि तन्मन्त्र कल्याणकारिभिः सिद्धान्तैः परिपूर्णानि सन्ति | अत एव सर्व शास्त्रेषु पुराणानां गौरवं गीतमस्ति | पुराणेषु भौगोलिकं विवेचनमतिविशदतया वर्णनं कृतमस्ति | तत्र भारतस्य वन-पर्वत-नदी-सरोवर-देश-जनपद-तीर्थ-पुण्यक्षेत्र-सिद्धपीठानां च महदुत्कृष्टम् वर्णनं विद्यते | आरण्यकभूभागपर्वतीयप्रदेशानां वर्णनप्रसंगे उपयोगिनां वनस्पतीनां परिचय लाभो भवति| पुराणासाहित्यं स्वरचनाकालत एव धार्मिकीं सामाजिकीं शिक्षाम् प्रददत् स्वकीयैरूपदेशा मृतैर्जनसमाजमाप्लावयत् महानतमुपकारं करोति, अकरोत्,करिष्यति चेति निश्चप्रचम् |

यो विद्याच्चतुरो वेदान् सांगोपनिषदो द्विजः |
न चेत्पुराणम् संविद्यान्नैव स स्याद् विचक्षणः || (८)

**संहितासाहित्ये पुराणम्**

ऋग्वेदे पुराणशब्दः कातिषुचित् स्थानेषु प्रयुक्तः | एकस्मिन् स्थाने “सनातन पुराणमधिये “ इत्यर्थ संवलितः पुराणशब्द ऋग्वेदे दृश्यते सना पुराणमध्येम्यारात् |(९) तत्रैव अश्विनीकुमारौ उद्दिश्य कथितं यद् युवयोः शिवं सख्यं स्थानं पुराणमस्ति - पुराणमोकः सख्यं शिवं वाम् |(१०) अन्यत्र अथर्ववेदे कथितं यत् पुराणस्य उदय उच्छिष्ट संज्ञकात् यज्ञात् ब्रह्मणो वऽभवत् | तस्माद् यज्ञादृग्यजुः सामच्छन्दोभिः सह पुराणम् दिवि स्थिता देवाश्च जज्ञिरे-

ऋचः सामानि छन्दांसि पुराणम् यजुषा सह |

उच्छिष्टाज्जज्ञिरे सर्वे दिवि देवा दिवि श्रित: ॥ (११)

अथर्ववेद एवेतिहासगाथानाराशंसीशब्दै: सह पुराणमपि सर्वं प्रियं प्रयुज्यते-

इतिहासस्य च वै स पुराणस्य च गाथानां च ।
नाराशंसीनां च प्रियं धाम भवति य एवं वेद ॥ (१२)

अथर्ववेदकालेऽपि पुराणविद् आसन्, यतो हि तंत्र पुराणविद् इति शब्दो दृश्यते -

येत आसीद् भूमि: पूर्वा यामद्धातय इद विदु: ।
यो वै तां विद्यान्नामथा सा मन्येत पुराणवित् ॥ (१३)

एभिरुद्धरणैर्ज्ञायते यद् वैदिकसंहिताकालेऽपि पुराणस्यास्तित्वमासीत् तथा वैदिककाले पुराणविज्ञापुरुषा अपि आसन्निती निर्विवादमेव सुधीभिरङ्गीकृतम् ।

**ब्राह्मणसाहित्ये पुराणम्**

ब्राह्मणसाहित्ये पुराणशब्दो बहुशो दृश्यते । बहून्याख्यानानि ब्राह्मणग्रन्थेषु संकेतमात्रेण किंचिद् विस्तरेण व निर्दिष्टानि । तानि पुर: पुराणेषु विस्तरेण प्रपंचितानि । शतपथब्राह्मण इतिहास पुराणयोर्मिथ: प्रयोगो दृश्यते ।"मध्वाहुतयो ह वा एता देवनाम्। यदनुशासनानि विद्यावाको वाक्यमितिहास पुराणम् गाथानाराशंस्य: । य एवं विद्वान् अनुशासनानि विद्यावाको वाक्यमितिहास पुराणम् गाथानाराशंसीरत्यिहरय: स्वाध्याय- मधिते । मध्वाहुतिभिरेव तद्देवां स्तर्पयति ॥ (१४) शतपथब्राह्मणस्येदं कथनं महत्वपूर्णमस्ति यत् पुराणम् वेद:, तस्मात्परिप्लवस्य नवम दिने किंचित्पुराणस्य पाठम् कुर्यात् -

अथ नवमेऽहन्......तानुपदिशति पुराणम् वेद: सोऽयमिति किंचितपुराणम् आचक्षीत ।(१५)

शतपथब्राह्मणस्येयमुक्ति: सार्था भवति ययेदं ज्ञायते यत् तस्मिन्काल ऋग्यजु: सामाथर्वांगिरस वेदैस्तुल्यमेवेतिहास पुराणयो: सम्मान् आसीत्- ऋग्वेदो यजुर्वेद: सामवेद: अथर्वांगिरस इतिहासपुराणम् विद्या उपनिषद: श्लोका: सूत्राणि अनुव्याख्यानानि व्याख्यानानि वाचैव सम्राट् प्रजायते । यथा -

य एवं विद्वान् वाको वाक्यमितिहासपुराणमित्यहरह: स्वाध्यायमधीते ॥ (१६)

गोपथब्राह्मणेऽभिहितं यत् कल्परहस्यब्राह्मणोपनिषदितिहासान्वाख्यातै: सह पुराण वेदाश्च निर्मिता:-एवमिमे सर्वे वेदा निर्मिता: सकल्पा: सरहस्या: सब्राह्मणा: सोपनिषत्का: सेतिहासा: सान्वाख्याता: सपुराणा:।(१७) गोपथब्राह्मणे तु न केवलं वेदै: सह पुराणस्य सम्बन्ध: स्थापित:, अपितु तत्र पञ्चवेदनां निर्माणचर्चायां पृक्तवेन पुराणस्य गणना वेदत्वेन कृता, यथा - पञ्चवेदान् निरमिमत सर्पवेदं पिशाचवेदस्य प्रतीच्य असुरवेदस्य उदीच्या इतिहासवेदस्य ध्रुवाऽधोदिश: ऊर्ध्वदिशश्च पुराणवेदस्य च निर्माणमभवत्।(१८) इत्थं ब्राह्मणग्रन्थ अनुशीलनेन प्रतीयते यत् वैदिकपरंपरायां ब्राह्मणकालेऽपि पुराणस्य पर्याप्तसम्मानमासीत् । अनेनैकस्य विशिष्टस्य तथ्यस्य उद्घाटनं भवति, तदिदमस्ति यच्छतपथब्राह्मण-इतिहासपुराणशब्दस्य सम्मिलितरूपेण समस्तपदत्वेन उल्लेखः कृतः । अनेनेतिहासपुराणयोर्विषयसादृश्यमासीदिति प्रतीयते ।

**आरण्यकोपनिषद्ग्रन्थेषु पुराणम्**

आरण्यकेषु ब्राह्मणप्रतिपादितानां यज्ञानामध्यात्मपरकव्याख्या ऋषिभि: कृता । भारतीय दर्शनस्य उद्गमभूता उपनिषद्ग्रन्था

ज्ञानप्रदीपेन भारतीयेभ्य सन्मार्गं प्रकाशयन्ति, ते च मुमुक्षूणाम् परम-उपादेया इत्यत्र नास्ति कांचित्संशीतिः । तेषु आरण्यक उपनिषद् ग्रन्थेषु पुराणशब्दस्य प्रयोगोऽनेकत्र विहितः । तैत्तरीय-आरण्यके कथितम्- यद् ब्राह्मणान् इतिहास पुराणानि कल्पान् गाथानाराशंसीर्मदाहुतयो देवानाम् अभवन् ।(१९)

किञ्च वृहदारण्यकोपनिषदि कथितं यत् यथाद्रेन्धन-संयोगादनायसेनैव धूमोनिस्सरति तथैव ऋग्वेदयजुर्वेदसामवेद-अथर्वांगिरस इतिहासपुराणानि ब्राहमणो निःश्वासितादेव अनायासेनैव जातानि-

> यथाद्रेन्धनाग्नेख्याहितान् पृथग्धूमा विनिश्चरन्ति, एवं वा अरेऽस्य महतोभूतस्य निःश्वासितमेतद् यद्दग्वेदो यजुर्वेदसामवेदोऽथर्वांगिरस इतिहासपुराणम् ।(२०)

इतिहासपुराणशब्दयोरुल्लेख छान्दोग्योपनिषद्यपि कृतः-

> नाम्नो भूयसी वाग्वा ऋग्वेदं विज्ञापयति याजुर्वेदं सामवेदमाथर्वणम् चतुर्थमितिहास पुराणम् पञ्चमम् ।(२१)

यदा नारदः सनत्कुमारस्य पार्श्वे अध्येतुं गतस्तदा तेन नारदः पृष्टः, तद् वचनम् -

> ऋग्वेदम् भगवोऽध्येमि यजुर्वेदम् सामवेदमाथर्वणम्
> चतुर्थमितिहासपुराणम् पंचमम् वेदानां वेदम् ।(२२)

एतेन वक्तुम् शक्यते यद् आरण्यकसाहित्यकाले अपि पुराणानाम् बहुत्वमासीत् ।

**सूत्रग्रन्थेषु पुराणम्**

गृहयसूत्रकल्पसूत्रधर्मसूत्रेषु पुराणस्य अस्तित्वम् तदध्ययनम् च तदुद्धरणैः उपलभ्यते । आश्वलायनगृहयसूत्रे लिखितं यत् इतिहासपुरामधीते तस्य पितरोऽमृतस्य कुल्या प्राप्नुवन्ति । यथा-

> यद्दचोधीते पयसः कुल्या अस्य पितृन् स्वधा उपक्षरन्ति, यद्द घृतस्य कुल्या, यत् सामानि मध्वः कुल्या यदथर्वाङ्गिरसः सोमस्य यद् ब्राहमणानि कल्पान् गाथानाराशंसिरीतिहासपुराणानीत्यमृताहुतिभिः ।(२३)

इत्थं आश्वलायनगृहयसूत्रेषु पुराणस्य बहुशः यत्र तत्र उल्लेखितत्वात् तस्मिन्काले पुराणानां सम्मानः क्रियते स्म । आपस्तम्बधर्मसूत्रग्रंथेऽपि कथितं-

> आभूतसंप्लवास्ते सग्रजितः, पुनः स्वर्गे बीजार्था भवंतीति भविष्यत्पुराणम् ।(२४)

पुराणम् केवलं साधारणेभ्यो जनेभ्य एव नोपादेयमपितु राज्ञामपि पुराणज्ञानम् अत्यावश्यकमस्ति,यतो हि राजानो वेदोपवेदधर्मशास्त्रपुराणान्यधीत्यैव शासनकर्माणि न्यायं कर्तुम् कुशाला भवन्ति । इममेवम् अवलंब्य गौतमधर्मसूत्रकारेण कथितम्-

> प्रजापालकस्य नृपतेश्च व्यवहारो वेदो धर्मशास्त्रम् अंगानी,उपवेदाः पुराणम् ।(२५)

कात्यायनपरिशिष्टशोचसूत्रम् आचमनविषये लिखितं यत् प्रथमाचमनेन ऋग्वेदं प्रीणाति, द्वितीयेन यजुर्वेदं,तृतीयेन सामवेदं, चतुर्थेन चाथर्ववेद-इतिहासपुराणानि प्रीणाति-

> प्रथममं यत् पिबति तेन ऋग्वेदं प्रीणाति
> द्वितीयं यत् पिबति तेन यजुर्वेदं प्रीणाति
> तृतीयं यत् पिबति तेन सामवेदं प्रीणाति
> चतुर्थं यत् पिबति तेनाथर्ववेदेतिहासपुराणानि प्रीणाति ॥ (२६)

अनेन वैदिकवाङ्गमये पुराणस्योपदेयत्वमासीत् | तत्काले पुराणानि विविधनामभिः प्रथितान्यभवन् | सूत्रग्रंथानुद्धरणै र्ज्ञायाते यत्पुराणानि पृथक्ग्रन्थकारकत्वेन पृथङ्ग- नामभिश्च समादृतानि विदुषाम् समाजे शोभन्ते स्म |

इतिहासपुराणाभ्यां वेदार्थस्योपबृंहणम् कर्त्तव्यम्, इत्यर्थोऽपि प्रतिपादितो महाभारते-

इतिहासपुराणाभ्यां वेदं समुपबृंहयेत् |
बिभेत्यल्पश्रुताद् वेदो मामयं प्रतरिष्यति ||[२७]

इत्थं वैदिकवाङगमये अनेकेषु स्थानेषु पुराणस्य विवेचनं प्राप्यते |

## संदर्भ


1. अष्टाध्यायी-४.३.२३,(१९९०) चौखम्बा संस्कृत प्रतिष्ठान्,दिल्ली
2. अष्टाध्यायी-४.३.१०५,(१९९०) चौखम्बा संस्कृत प्रतिष्ठान्,दिल्ली
3. अष्टाध्यायी-३.१.१३४,(१९९०) चौखम्बा संस्कृत प्रतिष्ठान्,दिल्ली
4. अथर्ववेद.११,७-२४, (१९९४) नाग प्रकाशन, नईदिल्ली
5. पुराणपर्यालोचनम्-२.१,(१९९९)चौखम्बा विद्या भवन,वाराणसी
6. कूर्मपुराणम्.पू.१.१२, (१९९१) गीताप्रेस,गोरखपुर,उ.प्र.
7. पु.पु.गवेषणात्मकभाग पृ.२८,(२००१)चौखम्बा विद्या भवन,वाराणसी
8. पद्मपुराण सृष्टिखण्ड-२.५१, (१९९५) गीताप्रेस,गोरखपुर,उ.प्र.
9. ऋग्वेदसंहिता.३.५४.९, (२००४) वेदज्योति प्रेस,दिल्ली
10. ऋग्वेदसंहिता.३.५८.६, (२००४) वेदज्योति प्रेस,दिल्ली
11. अथर्ववेद सं.१५-१.६.१२, (१९९४) नाग प्रकाशन, नईदिल्ली
12. अथर्ववेद संहिता, (१९९४) नाग प्रकाशन, नईदिल्ली
13. शतपथब्राह्मणम्.११.५.६-८, (१९८५)चौखम्बा संस्कृत प्रतिष्ठान्,दिल्ली
14. शतपथब्राह्मणम्.१३.४.३-१२, (१९८५)चौखम्बा संस्कृत प्रतिष्ठान्,दिल्ली
15. शतपथब्राह्मणम्.११.५.७-९, (१९८५)चौखम्बा संस्कृत प्रतिष्ठान्,दिल्ली
16. गोपथब्राह्मणम्.पू.२.१०, (१९९३)प्रज्ञादेवी,चौखम्बा संस्कृत प्रतिष्ठान्,दिल्ली
17. गोपथब्राह्मणम्.पू.भा. (१९९३)प्रज्ञादेवी,चौखम्बा संस्कृत प्रतिष्ठान्,दिल्ली
18. तैत्तिरीयारणयकं.२.९, (१९९१)चौखम्बा संस्कृत प्रतिष्ठान्,दिल्ली
19. बृहदारण्यक-उपनिषद.२.४.११, (१९८९)गीताप्रेस,गोरखपुर,उ.प्र.
20. छान्दोग्य-उपनिषद.७.२.१, (१९९०)गीताप्रेस,गोरखपुर,उ.प्र.
21. छान्दोग्य-उपनिषद.७.१.२, (१९९०)गीताप्रेस,गोरखपुर,उ.प्र.
22. आश्वलायनगृह्यसूत्रम्.३.३.५१, (१९९१)चौखम्बा संस्कृत प्रतिष्ठान्,दिल्ली
23. आपस्तम्बधर्मसूत्रम्.२.९.४.५, (१९८५)चौखम्बा विद्याभवन,वाराणसी
24. गौतमधर्मसूत्रम्.१.१.२१, (१९९६)चौखम्बा विद्या भवन,वाराणसी
25. कात्यायनगृहयसूत्रम् (१९९२)चौखम्बा विद्या भवन,वाराणसी
26. पारस्करगृह्यसूत्रम्, (१९९७)चौखम्बा विद्या भवन,वाराणसी
27. महाभारत,आ.पर्व.१.२६७, (१९८९) गीताप्रेस,गोरखपुर,उ.प्र.